# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१९)

११.०३.२०१३

# पुनरावर्तनम्

- स्वाङ्गलक्षणम्
- अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ।
- अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ॥

# ५११. नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च (४.१.५५)

- पदद्वयम् । नासिका-उदर-ओष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गात्, च ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति, 'अस्वाङ्गपूर्वपदाद्वा' (४.१.५३) इत्यतः 'वा' इति, 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (४.१.५४) इत्यतः 'उपसर्जनाद्' इति च अनुवर्तते ।
- एभ्यो वा ङीष् स्यात् ।
- आद्ययोः बह्वज्लक्षणः निषेधः बाध्यते, पुरस्तादपवादन्यायात् ।
- 'न क्रोडादिबह्वचः' (४.१.५६)
- 'पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (प)।

- स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् - ४.१.५४
- नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च - ४.१.५५ - ङीष्प्राप्तिः
- न क्रोडादिबह्वचः - ४.१.५६ - ङीष्निषेधः
- सहनञ्विद्यमानपूर्वाच्च - ४.१.५७ - ङीष्निषेधः

- आद्ययोरिति ।

- ओष्ठादीनां पञ्चानां तु ‘असंयोगोपधात्’ इति पर्युदासे प्राप्ते वचनम्, मध्येऽपवादन्यायात् ।
- ‘मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्’ (प)
- सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः ।
- ‘सहनञ्विद्यमानपूर्वाच्च’ (४.१.५७)

- स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् - ४.१.५४ - ङीष्निषेधः
- नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च - ४.१.५५ - ङीष्प्राप्तिः
- न क्रोडादिबह्वचः - ४.१.५६
- सहनञ्विद्यमानपूर्वाच्च - ४.१.५७ - ङीष्निषेधः

- ओष्ठादीनामिति ।

- तुङ्गनासिकी, तुङ्गनासिकेत्यादि ।
- इत्यादीति ।
- नेह ।
- सहनासिका, अनासिका ।
- नेह सहनासिकेति ।

- अत्र वृत्तिः - अङ्गगात्रकण्ठेभ्यो वक्तव्यम् ।
- स्वङ्गी, स्वङ्गेत्यादि ।
- स्वङ्गीति ।
- एतच्च अनुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् ।
- 'भाष्याद्यनुक्तत्वादप्रमाणम्' इति प्रामाणिकाः ।
- प्रामाणिका इति ।

- अत्र वार्तिकानि ।
- पुच्छाच्च (वा)
- सुपुच्छी, सुपुच्छा ।

- कबरमणिविषशरेभ्यो नित्यम् (वा)
- कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरीत्यादि ।
- इत्यादीति ।

- उपमानात्पक्षाच्च पुच्छाच्च (वा)
- उपमानादिति ।
- नित्यमित्येव ।
- उलूकपक्षी शाला ।
- उलूकपक्षी शालेति ।
- उलूकपुच्छी सेना ।
- उलूकपुच्छी सेनेति ।

# ५१२. न क्रोडादिबह्वचः (४.१.५६)

- पदद्वयम् । न, क्रोडादि-बह्वचः ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्’ (४.१.५४) इत्यतः ‘स्वाङ्गात्’ इति च अनुवर्तते ।
- क्रोडादेः बह्वचश्च स्वाङ्गात् न ङीष् ।
- कल्याणक्रोडा ।
- अश्वानामुरः क्रोडा ।
- कल्याणक्रोडेति । अश्वानामिति ।
- आकृतिगणोऽयम् ।
- सुजघना ।

# ५१३. सहनञ्विद्यमानपूर्वाच्च (४.१.५७)

- पदद्वयम् । सह-नञ्-विद्यमानपूर्वात्, च ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्’ (४.१.५४) इत्यतः ‘स्वाङ्गात्’ इति, ‘न क्रोडादिबह्वचः’ (४.१.५६) इत्यतः ‘न’ इति च अनुवर्तते ।
- सहेत्यादित्रिकपूर्वात् न ङीष् ।
- सकेशा ।
- सकेशेति ।
- अकेशा ।
- विद्यमाननासिका ।

# ५१४. नखमुखात्संज्ञायाम् (४.१.५८)

- पदद्वयम् । नखमुखात्, संज्ञायाम् ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्’ (४.१.५४) इत्यतः ‘स्वाङ्गात्’ इति, ‘न क्रोडादिबह्वचः’ (४.१.५६) इत्यतः ‘न’ इति च अनुवर्तते ।
- ङीष् न स्यात् ।
- शूर्पणखा ।
- शूर्पणखेति ।
- गौरमुखा ।
- गौरमुखेति ।

- संज्ञायां किम्?
- ताम्रमुखी कन्या ।
- ताम्रमुखीति ।

# ५१५. दिक्पूर्वपदान्ङीप् (४.१.६०)

- पदद्वयम् । दिक्पूर्वपदात्, ङीप् ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्’ (४.१.५४) इत्यतः ‘स्वाङ्गात्’ इति च अनुवर्तते ।
- दिक्पूर्वपदात् स्वाङ्गान्तात् प्रातिपदिकात् परस्य ङीषः ङीबादेशः स्यात् ।
- दिक्पूर्वपदादिति ।
- प्राङ्मुखी ।
- प्राङ्मुखीति ।
- आद्युदात्तं पदम् ।
- आद्युदात्तं पदमिति ।